# Shri KanakadurgA AnandalaharI

# શ્રીકનકદુર્ગાઽઽનન્દલહરી

## Document Information

Text title : kanakadurgAnandalaharI

File name : kanakadurgAnandalaharI.itx

Category : devii, durgA, laharI, devI

Location : doc_devii

Author : Vidyashankara

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada, PSA Easwaran, Chandra V Ramani

Description-comments : The composition is addressed to the goddess Kanaka Durga at Vijayawada of Andhra Pradesh.

Latest update : December 28, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીકનકદુર્ગાઽઽનન્દલહરી

વન્દે ગુરુપદદ્વન્દ્વમવાઙ્માનસગોચરમ્ ।
રક્તશુક્લપ્રભામિશ્રમતર્ક્યં ત્રૈપુરં મહઃ ॥

અખણ્ડમણ્ડલાકારં વિશ્વં વ્યાપ્ય વ્યવસ્થિતમ્ ।
તત્પદં દર્શિતં યેન તસ્મૈ શ્રીગુરવે નમઃ ॥

શિવે સેવાસક્તાશ્રિતભરણકાર્યૈકચતુરે
    શિરોભિર્વેદાનાં ચિરવિનુતકલ્યાણચરિતે ।
સ્મિતજ્યોત્સ્નાલીલારુચિરરુચિમચ્ચન્દ્રવદને
    જગન્માતર્માતર્જય કનકદુર્ગે ભગવતિ ॥ ૧॥

નગાધીશટ્કન્યે નલિનદળસઙ્કાશનયને
    સુગીતૈર્ગન્ધર્વૈસ્સુરયુવતિભિશ્ચાનુચરિતે ।    var  શ્લાઘ્યચરિતે
અગણ્યૈરામ્નાયૈરપિ ગુણનિકાયૈર્વિલસિતે
    જગન્માતર્માતર્જય કનકદુર્ગે ભગવતિ ॥ ૨॥

નિજશ્રેયસ્કામૈર્નિટલઘટિતાં ચ તત્કરપુટૈઃ
    સ્તુવદ્ભિસ્સાનન્દં શ્રુતિમધુરવાચાં વિરચનૈઃ ।
અસઙ્ખ્યૈર્બ્રહ્માદ્યૈરમરસમુદાયૈઃ પરિવૃતે
    દયા કર્તવ્યા તે મયિ કનકદુર્ગે ભગવતિ ॥ ૩॥

ભવત્પાદન્યાસોચિતકનકપીઠીપરિસરે
    પતન્તસ્સાષ્ટાઙ્ગં મુદિતહૃદયા બ્રહ્મઋષયઃ ।
ન વાઞ્છન્તિ સ્વર્ગં ન ચ કમલસમ્ભૂતભવનં
    ન વા મુક્તેર્માર્ગં નનુ કનકદુર્ગે ભગવતિ ॥ ૪॥

શચીસ્વાહાદેવીપ્રમુખહરિદીશાનરમણી-
    મણીહસ્તન્યસ્તૈર્મણિખચિતપાત્રૈરનુદિનમ્ ।
સસઙ્ગીતં નીરાજિતચરણપઙ્કેરુહયુગે

કૃપાપૂરં મહ્યં દિશ કનકદુર્ગે ભગવતિ ॥ ૫॥

પ્રવર્ષત્યશ્રાન્તં બહુગુણમભીષ્ટાર્થનિચયં
સ્વરૂપધ્યાતૄણાં ચિકુરનિકુરુમ્બં તવ શિવે ।
અપામેકં વર્ષં વિતરતિ કદાચિજ્જલધરો
દ્વયોસ્સામ્યં કિં સ્યાન્નનુ કનકદુર્ગે ભગવતિ ॥ ૬॥

કૃશાઙ્ગં સ્વારાતિં તુહિનકરમાવૃત્ય તરસા
સ્થિતં મન્યે ધન્યે તિમિરનિકરં તે કચભરમ્ ।
સહાયં કૃત્વાયં હરમનસિ મોહાન્ધતમસં
વિતેને કામઃ શ્રીમતિ કનકદુર્ગે ભગવતિ ॥ ૭॥

તમો નામ્ના સમ્યગ્ગળિતપુનરુદ્ભ્રાન્તરુચિર-
પ્રભાશેષં ભાનોરિવ તરુણિમાનં ધૃતવતઃ ।
ત્વદીયે સીમન્તે કૃતપદમિદં કુઙ્કુમરજો-
વસેદશ્રાન્તં મે હૃદિ કનકદુર્ગે ભગવતિ ॥ ૮॥

ત્રિલોકી વૈચિત્રીજનકઘનસૌન્દર્યસદનં
વિરાજત્કસ્તૂરીતિલકમપિ ફાલે વિજયતે ।
યદાલોકવ્રીડાકુપિત ઇવ જૂટે પશુપતે-
ર્વિલીનો બાલેન્દુર્નનુ કનકદુર્ગે ભગવતિ ॥ ૯॥

પરાભૂતશ્ચેશાળિકનયનકીલાવિલસના-
દ્વિસૃજ્ય પ્રાચીનં ભુવનવિનુતં કાર્મુકવરમ્ ।
હરં જેતું ત્વદ્ભ્રૂચ્છલમપરબાણાસનયુગં
સ્મરો ધત્તે સર્વેશ્વરિ કનકદુર્ગે ભગવતિ ॥ ૧૦॥

ત્વદીયભ્રૂવલ્લીચ્છલમદનકોદણ્ડયુગળી
સમીપે વિભ્રાજત્તવ સુવિપુલં નેત્રયુગળમ્ ।
વિજેતું સ્વારાતિં વિકચનવનીલોત્પલશર-
દ્વયં તેનાનીતં ખલુ કનકદુર્ગે ભગવતિ ॥ ૧૧॥

દરિદ્રં શ્રીમન્તં જરઠમબલાનાં પ્રિયતમં
જડં સઙ્ખ્યાવન્તં સમરચલિતં શૌર્યકલિતમ્ ।
મનુષ્યં કુર્વન્તોऽમરપરિવૃઢં નિત્યસદયાઃ
કટાક્ષાસ્તે કાર્યા મયિ કનકદુર્ગે ભગવતિ ॥ ૧૨॥

પુરારાતેર્બાણાઃ કુસુમશરતૂણીરગળિતા
    નતાનાં સન્ત્રાણે નિરવધિસુધાવીચિનિચયાઃ ।
વિયદ્ગઙ્ગાભઙ્ગા બહુદુરિતજાલાવૃતિમતાં
    કટાક્ષાસ્તે કાર્યા મયિ કનકદુર્ગે ભગવતિ ॥ ૧૩॥

દરિદ્રાણાં કલ્પદ્રુમસુમમરન્દોદકઝરા
    અવિદ્યાધ્વાન્તાનામરુણકિરણાનાં વિહૃતયઃ ।
પુરા પુણ્યશ્રેણીસુલલિતલતાચૈત્રસમયાઃ
    કટાક્ષાસ્તે કાર્યા મયિ કનકદુર્ગે ભગવતિ ॥ ૧૪॥

ગજન્તો વાહન્તઃ કનકમણિનિર્માણવિલસા
    રથન્તશ્છત્રન્તો બલયુત ભટન્તઃ પ્રતિદિનમ્ ।
સ્વભક્તાનાં ગેહાઙ્ગણભુવિ ચરન્તો નિરુપમાઃ
    કટાક્ષાસ્તે કાર્યા મયિ કનકદુર્ગે ભગવતિ ॥ ૧૫॥

પુરારાતેરઙ્ગં પુલકનિકુરમ્બૈઃ પરિવૃતં
    મુનિવ્રાતૈર્ધ્યાતં મુકુળયુતકલ્પદ્રુમનિભમ્ ।
શ્રયન્તશ્ચાનન્દં વિચલદલિપોતા ઇવ ચિરં
    કટાક્ષાસ્તે કાર્યા મયિ કનકદુર્ગે ભગવતિ ॥ ૧૬॥

હરિબ્રહ્મેન્દ્રાદ્યૈઃ શ્રુતિવિદિતગીર્વાણનિચયૈ-
    ર્વસિષ્ઠવ્યાસાદ્યૈરપિ ચ પરમબ્રહ્મઋષિભિઃ ।
સમસ્તૈરાશાસ્યાસ્સકલશુભદા યદ્વિહૃતયઃ
    કટાક્ષાસ્તે કાર્યા મયિ કનકદુર્ગે ભગવતિ ॥ ૧૭॥

વિરિઞ્ચિર્યદ્યોગાદ્વિરચયતિ લોકાન્ પ્રતિદિનં
    વિધત્તે લક્ષ્મીશો વિવિધજગતાં રક્ષણવિધિમ્ ।
લલાટાક્ષો દક્ષોऽભવદખિલસંહારકરણે
    કટાક્ષાસ્તે કાર્યા મયિ કનકદુર્ગે ભગવતિ ॥ ૧૮॥

ઉરોભાગે શમ્ભોર્વિકચનવનીલોત્પલદળ-
    સ્રજં સઙ્ગૃહ્ણન્તો મૃગમદરસં ફાલફલકે ।
શિરોऽગ્રે ગઙ્ગાયાં રવિદુહિતૃસન્દેહજનકાઃ
    કટાક્ષાસ્તે કાર્યા મયિ કનકદુર્ગે ભગવતિ ॥ ૧૯॥

મદીયશ્રીલીલાહરણપટુપાટચ્ચરમિતિ
    ક્વતા હન્તાગન્તું શ્રુતિવિમલનીલોત્પલમિવ ।

તદભ્યર્ણં યાતાસ્સહજનિજવૈશાલ્યકલિતાઃ
    કટાક્ષાસ્તે કાર્યા મયિ કનકદુર્ગે ભગવતિ ॥ ૨૦॥

કળઙ્કી માસાન્તે વહતિ કૃશતાં નિત્યજડ ઇ-
    ત્યમું ચન્દ્રં હિત્વા તવ વદનચન્દ્રાશ્રિતમિદમ્ ।
સ્થિતં જીવં જીવદ્વિતયમિતિ મન્યે નયનયો-
    ર્યુગં કામારાતેસ્સતિ કનકદુર્ગે ભગવતિ ॥ ૨૧॥

પ્રસાદો મય્યાસ્તે મયિ ચ સહજં સૌરભમિદં
    તુલા મે મૈતસ્યેત્યવિરતવિવાદાભિરતયોઃ ।
નિવૃત્તા નેદાનીમપિ ચ રિપુતા ગ્લૌનળિનયો-
    સ્ત્વદાસ્યં દૃષ્ટ્વા શ્રીમતિ કનકદુર્ગે ભગવતિ ॥ ૨૨॥

મનોજાતાદર્શપ્રતિમનિજલીલૌ તવ શિવે
    કપોલૌ ભૂયાસ્તાં મમ સકલકલ્યાણજનકૌ ।
શ્રિતશ્રીતાટઙ્કદ્વિતયરુચયો યત્ર મિળિતા-
    સ્સુધારુક્સૂર્યાભા ઇવ કનકદુર્ગે ભગવતિ ॥ ૨૩॥

ત્રયી સ્તુત્યે નિત્યે તવ વદનપઙ્કેરુહભવ-
    ત્સુગન્ધાયાતશ્રીપ્રચલદળિનીવારણધિયા ।
લસન્નાસાકારે વહસિ સહસા ચમ્પકતુલાં
    ન તત્સૌન્દર્યાર્થં નનુ કનકદુર્ગે ભગવતિ ॥ ૨૪॥

વહત્વં કારુણ્યં વરકમલરાગાહ્વયમણિ-
    સ્સુધાપૂરં સારં સુરુચિરમૃદુત્વં યદિ વહેત્ ।
તદા લબ્ધું યોગ્યો ભવતિ ભવદીયાધરતુલાં
    જગદ્રક્ષાદીક્ષાવતિ કનકદુર્ગે ભગવતિ ॥ ૨૫॥

લસન્નાસાભૂષાગ્રગપૃથુલમુક્તામણિયુતં
    નિતાન્તારુણ્યન્તત્તવ દશનવાસો વિજયતે ।
સુધાસિન્ધોર્મધ્યે નિપતિત સુધાબિન્દુસહિત-
    પ્રવાળશ્રીચોરં નનુ કનકદુર્ગે ભગવતિ ॥ ૨૬॥

અયોગ્યા ઇત્યાર્યૈ તવ દશનસામ્યાય કવિભિ-
    ર્વિમુક્તા મુક્તા ઇત્યધિકવિદિતા મૌક્તિકગણાઃ ।
દશામલ્પાઙ્ગત્વા તદનુમુખતામ્બૂલસહિતા
    ગતાસ્તત્સાહિત્યં ખલુ કનકદુર્ગે ભગવતિ ॥ ૨૭॥

જિતોऽહં પાર્વત્યા મૃદુલતરવાણીવિલસનૈઃ
    કથં દૃપ્યસ્યમ્બાધરસમતયા બિમ્બ કથય ।
ઇતિ ક્રોધાચ્ચ્ઞ્ચ્વા દળિતવદને રક્તિમયુતઃ
    શુકોऽયં વિજ્ઞાની ખલુ કનકદુર્ગે ભગવતિ ॥ ૨૮॥

ફલં બિમ્બસ્યેદં ભવતિ ભવદીયાધરતુલા
    કૃતાળં તન્માદ્યં વહતિ મતિરસ્યેતિ વિદિતા ।
ન ચેત્તસ્મિન્ ભુક્તે સુમતિ કવિતાનામપિ નૃણાં
    કથં સ્યાત્તન્માદ્યં ભુવિ કનકદુર્ગે ભગવતિ ॥ ૨૯॥

અતુલ્યં તે કણ્ઠં હરતરુણિ દૃષ્ટ્વા સુકવયઃ
    પ્રભાષન્તે શઙ્ખં પરિહસનપાત્રં ભવતિ તત્ ।
સ્વરૂપધ્યાતૃણાં સ ભવતિ નિધિશ્શઙ્ખ ઇતિચે-
    દસન્દેહં સ્થાને ખલુ કનકદુર્ગે ભગવતિ ॥ ૩૦॥

આકણ્ઠં તે કણ્ઠસ્થિતકનકસૂત્રં વિજયતે
    હરો યત્સામર્થ્યાદમૃતમિવ પીત્વાપિ ગરળમ્ ।
સમાખ્યાં વિખ્યાતાં સમલભત મૃત્યુઞ્જય ઇતિ
    ત્રયીવેદ્યક્રીડાવતિ કનકદુર્ગે ભગવતિ ॥ ૩૧॥

ચિરં ધ્યાત્વા ધ્યાત્વા સકલવિબુધાભીષ્ટનિચયં
    તતસ્ત્વલ્લાવણ્યામૃતજલધિસમ્પ્રાપ્તજનને ।
ભુજાકારેણૈકે ભુવનવિનુતે કલ્પકલતે
    શ્રિયૈ મે ભૂયાસ્તાં નનુ કનકદુર્ગે ભગવતિ ॥ ૩૨॥

વિરાજત્કેયૂરદ્વયમણિવિભાભાનુકિરણૈ-
    ર્નિતાન્તવ્યાકોશીકૃતમદનજિન્નેત્રકમલૌ ।
વિભોઃ કણ્ઠાશ્લેષાદ્વિપુલપુલકાઙ્કૂરજનકૌ
    ભુજૌ મે ત્રાતારૌ નનુ કનકદુર્ગે ભગવતિ ॥ ૩૩॥

સુપર્વારામાન્તઃસ્ફુરિતસહકારદ્રુમલતા-
    સમગ્રશ્રીજાગ્રત્કિસલયસગર્વોદ્યમહરૌ ।
કરૌ તે ભૂયાસ્તાં મમ શુભકરૌ કાન્તિનિકરા-
    કરૌ નિશ્શઙ્કં શાઙ્કરિ કનકદુર્ગે ભગવતિ ॥ ૩૪॥

પ્રશસ્તૌ ત્રૈલોક્યે બહુળદનુજત્રાસવિચલ-

    ન્મરુન્મસ્તન્યસ્તૌ જનનિ તવ હસ્તૌ હૃદિ ભજે ।
સ્મરો યત્સઙ્કાશા ઇતિ કિસલયાનેવ ધૃતવાન્
    ત્રિલોકી જેતાઽઽસીત્ખલુ કનકદુર્ગે ભગવતિ ॥ ૩૫॥

પુરારાતેઃ પાણિગ્રહણસમયે મૌક્તિકચયાન્
    વિધાતું તચ્છીર્ષે જનકવચનાદુન્નમિતયોઃ ।
યયોરૂપં દૃષ્ટ્વાઽભવદુદિતલજ્જા સુરનદી
    કદાર્તિત્રાતારૌ મમ કનકદુર્ગે ભગવતિ ॥ ૩૬॥

સ્ફુરન્તો નિશ્શઙ્કં પુરહરનિરાતઙ્કવિજય-
    ક્રિયાયાત્રોદ્યુક્તસ્મરબિરુદપાઠા ઇવ ભૃશમ્ ।
ઝણત્કારારાવાઃ કનકવલયાનાં તવ શિવે
    વિતન્વન્તુ શ્રેયો મમ કનકદુર્ગે ભગવતિ ॥ ૩૭॥

કુચૌ તે રૂપશ્રીવિજિતલકુચૌ મે શુભકરૌ
    ભવેતાં વ્યાકીર્ણૌ પ્રકટતરમુક્તામણિરુચૌ ।
વિરિઞ્ચાદ્યા દેવા યદુદિતસુધાપાતુરનિશં
    સુનમ્રાસ્સેનાન્યો નનુ કનકદુર્ગે ભગવતિ ॥ ૩૮॥

અતુલ્યં તે મધ્યં વદતિ હરિમધ્યેન સદૃશં
    જગત્તન્નો યુક્તં જનનિ ખલુ તદ્રૂપકલને ।
કૃતાશઃ પઞ્ચાસ્યો ભવતિ તવ વાહઃ પ્રતિદિનં
    જગત્સર્ગક્રીડાવતિ કનકદુર્ગે ભગવતિ ॥ ૩૯॥

અસૌ પુન્નાગસ્ય પ્રસવમૃદુશાખાશ્વલગતં
    તપઃકૃત્વા લેભે જનનિ તવ નાભેઃ સદૃશતામ્ ।
પ્રમત્તઃ પુન્નાગપ્રસવ ઇતરસ્તાવક ગતે-
    સ્તુલામાસું વાઞ્છત્યપિ કનકદુર્ગે ભગવતિ ॥ ૪૦॥

ત્રિલોકીવાસાઞ્ચદ્યુવતિજનતાદુર્ગમભવ-
    ન્નિતમ્બશ્રીચૌર્યં કૃતવદિતિ સઞ્ચિત્ય પુલિનમ્ ।
સરો બાહ્યઞ્ચક્રે જનનિ ભવદીયસ્મરણતો
    ઝરેવાધીરૈશા જનનિ કનકદુર્ગે ભગવતિ ॥ ૪૧॥

જિતોઽહં પાર્વત્યા મૃદુતરગતીનાં વિલસનૈઃ
    તદૂર્વોસ્સૌન્દર્યં સહજમધિગન્તું જડતયા ।
કૃતારમ્ભા રમ્ભા ઇતિ વિદળિતાઽઽસાં વનમયં

કરી સામર્ષઃ શ્રીકરિ કનકદુર્ગે ભગવતિ ॥ ૪૨॥

પ્રવિષ્ટા તે નાભીબિલમસિતરોમાવળિરિયં
કટીચઞ્ચત્કાઞ્ચીગુણવિહિતસૌત્રામણમણેઃ ।
રુચાં રેખેવાસ્તે રુચિરતરમૂર્ધ્વાયનગતા
શ્રિતશ્રેણીસમ્પત્કરિ કનકદુર્ગે ભગવતિ ॥ ૪૩॥

અનિર્વાચ્યં જઙ્ઘારુચિરરુચિસૌન્દર્યવિભવં
કથં પ્રાપ્તું યોગ્યસ્તવ કલમગર્ભો ગિરિસુતે ।
તદીયં સૌભાગ્યં કણિશજનનૈકાવધિ સુધી-
જનૈશ્ચિન્તાકાર્યા નનુ કનકદુર્ગે ભગવતિ ॥ ૪૪॥

સદા મે ભૂયાત્તે પ્રપદમમિતાભીષ્ટસુખદં
સુરસ્ત્રીફાલાગ્રચ્યુતમૃગમદાનાં સમુદયમ્ ।
અશેષં નિર્ધૌતઃ પ્રણયકલહે યત્ર પુરજિ-
જ્જટા ગઙ્ગાનીરૈર્નનુ કનકદુર્ગે ભગવતિ ॥ ૪૫॥

મનોજ્ઞાકારં તે મધુરનિનદં નૂપુરયુગં
ગ્રહીતું વિખ્યાતાન્ ગતિવિલસનાનામતિરયાન્ ।
સ્થિતમ્મન્યે હંસદ્વયમિતિ ન ચેદ્ધંસકપદં
કથં ધત્તે નામ્ના નનુ કનકદુર્ગે ભગવતિ ॥ ૪૬॥

ત્વદીયં પાદાબ્જદ્વયમચલકન્યે વિજયતે
સુરસ્ત્રીકસ્તૂરીતિલકનિકરાત્યન્તસુરભિ ।
ભ્રમન્તો યત્રાર્યાપ્રકરહૃદયેન્દિન્દિરગણા-
સ્સદા માદ્યન્તિ શ્રીમતિ કનકદુર્ગે ભગવતિ ॥ ૪૭॥

અપર્ણે તે પાદાવતનુતનુલાવણ્યસરસી
સમુદ્ભૂતે પદ્મે ઇતિ સુકવિભિર્નિશ્ચિતમિદમ્ ।
ન ચેદ્ગીર્વાણસ્ત્રીસમુદયલલાટભ્રમરકાઃ
કથં તત્રાસક્તા નનુ કનકદુર્ગે ભગવતિ ॥ ૪૮॥

રમાવાણીન્દ્રાણીમુખયુવતિસીમન્તપદવી-
નવીનાર્કચ્છાયાસદૃશરુચિ યત્કુઙ્કુમરજઃ ।
સ્વકાઙ્ગાકારેણ સ્થિતમિતિ ભવત્પાદકમલ-
દ્વયે મન્યે શમ્ભોસ્સતિ કનકદુર્ગે ભગવતિ ॥ ૪૯॥

દવાગ્નિં નીહારં ગરળમમૃતં વાર્ધિમવની-
    સ્થલં મૃત્યુમ્મિત્રં રિપુમપિ ચ સેવાકરજનમ્ ।
વિશઙ્કું કુર્વન્તો જનનિ તવ પાદામ્બુરુહયોઃ
    પ્રણામાસ્સંસ્તુત્યા મમ કનકદુર્ગે ભગવતિ ॥ ૫૦॥

જલપ્રાયા વિદ્યા હૃદિ સકલકામાઃ કરગતાઃ
    મહાલક્ષ્મીર્દાસી મનુજપતિવર્યાસ્સહચરાઃ ।
ભવત્યશ્રાન્તં તે પદકમલયોર્ભક્તિસહિતાં
    નતિઙ્કુર્વાણાનાં નનુ કનકદુર્ગે ભગવતિ ॥ ૫૧॥

તવ શ્રીમત્પાદદ્વિતયગતમઞ્જીરવિલસ-
    ન્મણિચ્છાયાચ્છન્નાકૃતિભવતિયત્ફાલફલકમ્ ।
સ તત્રૈવાશેષાવનિવહનદીક્ષાસમુચિતં
    વહેત્પટ્ટં હૈમં નનુ કનકદુર્ગે ભગવતિ ॥ ૫૨॥

તનોતુ ક્ષેમં ત્વચ્ચરણનખચન્દ્રાવળિરિયં
    ભવત્પ્રાણેશસ્ય પ્રણયકલહારમ્ભસમયે ।
યદીયજ્યોત્સ્નાભિર્ભવતિ નિતરાં પૂરિતતનુ-
    શ્શિરોઽગ્રે બાલેન્દુર્નનુ કનકદુર્ગે ભગવતિ ॥ ૫૩॥

સમસ્તાશાધીશપ્રવરવનિતાહસ્તકમલૈ-
    સ્સુમૈઃ કલ્પદ્રૂણાં નિરતકૃતપૂજૌ નિરુપમૌ ।
નતાનામિષ્ટાર્થપ્રકરઘટનાપાટવયુતૌ
    નમસ્યામઃ પાદૌ તવ કનકદુર્ગે ભગવતિ ॥ ૫૪॥

પુરા બાલ્યે શીતાચલપરિસરક્ષોણિચરણે
    યયોસ્સ્પર્શં લબ્ધ્વા મુદિતમનસઃ કીટનિચયાન્ ।
વિલોક્ય શ્લાઘન્તે વિબુધસમુદાયાઃ પ્રતિદિનં
    નમામસ્તૌ પાદૌ નનુ કનકદુર્ગે ભગવતિ ॥ ૫૫॥

નરાણામજ્ઞાનાં પ્રશમયિતુમન્તઃસ્થતિમિરા-
    ણ્યલક્ષ્મીસન્તાપં ગમિતમનુજાન્ શીતલયિતુમ્ ।
સમર્થાન્નિર્દોષાંશ્ચરણનખચન્દ્રાનભિનવાન્
    નમામસ્સદ્ભક્ત્યા તવ કનકદુર્ગે ભગવતિ ॥ ૫૬॥

મુકુન્દબ્રહ્મેન્દ્રપ્રમુખબહુબર્હિર્મુખશિખા-
    વિભૂષાવિભ્રાજન્મઘવમણિસન્દર્ભરુચિભિઃ ।

વિશઙ્કું સાકં ત્વચ્ચરણનખચન્દ્રેષુઘટિતં
　　કવીન્દ્રૈઃ સ્તોતવ્યં તવ કનકદુર્ગે ભગવતિ ॥ ૫૭॥

નખાનાં ધાવળ્યં નિજમરુણિમાનઞ્ચ સહજં
　　નમદ્ગીર્વાણસ્ત્રીતિલકમૃગનાભિશ્રિયમપિ ।
વહન્તૌ સત્ત્વાદિત્રિગુણરુચિસારાનિવ સદા
　　નમસ્યામઃ પાદૌ તવ કનકદુર્ગે ભગવતિ ॥ ૫૮॥

મણિશ્રેણીભાસ્વત્કનકમયમઞ્જીરયુગળી-
　　ઝણત્કારારાવચ્છલમધુરવાચાં વિલસનૈઃ ।
અભીષ્ટાર્થાન્ દાતું વિનતજનતાહ્વાનચતુરા-
　　વિવ ખ્યાતૌ પાદૌ તવ કનકદુર્ગે ભગવતિ ॥ ૫૯॥

નમદ્ગીર્વાણસ્ત્રીતિલકમૃગનાભીદ્રવયુતં
　　નખચ્છાયાયુક્તં જનનિ તવ પાદામ્બુ જયતિ ।
સમઞ્ચત્કાળિન્દીઝરસલિલસમ્મિશ્રિતવિય-
　　ન્નદીવારીવ શ્રીકરિ કનકદુર્ગે ભગવતિ ॥ ૬૦॥

સુરશ્રેણીપાણિદ્વિતયગતમાણિક્યકલશૈ-
　　ર્ધૃતં હેમામ્ભોજપ્રકરમકરન્દેન મિળિતમ્ ।
સતાં વૃન્દૈર્વન્દ્યં ચરણયુગસઙ્ક્ષાળનજલં
　　પુનાત્વસ્માન્નિત્યં તવ કનકદુર્ગે ભગવતિ ॥ ૬૧॥

વિરાવન્મઞ્જીરદ્વયનિહિતહીરોપલરુચિ-
　　પ્રસાદે નિર્ભેદં પ્રથિતપરમબ્રહ્મઋષિભિઃ ।
શિરોભાગૈર્ધાર્યં પદકમલનિર્ણેજનજલં
　　વસન્મે શીર્ષાગ્રે તવ કનકદુર્ગે ભગવતિ ॥ ૬૨॥

સમીપે માણિક્યસ્થગિતપદપીઠસ્ય નમતાં
　　શિરસ્સુ ત્વત્પાદસ્નપનસલિલં યન્નિપતતિ ।
તદેવોચ્ચસ્થાનસ્થિતિકૃદભિષેકામ્બુ ભવતિ
　　પ્રભાવોऽયં વર્ણ્યસ્તવ કનકદુર્ગે ભગવતિ ॥ ૬૩॥

નૃણાન્દીનાનાં ત્વચ્ચરણકમલૈકાશ્રયવતાં
　　મહાલક્ષ્મીપ્રાપ્તિર્ભવતિ ન હિ ચિત્રાસ્પદમિદમ્ ।
સમાશ્રિત્યામ્ભોજં જડમપિ ચ રેખાકૃતિધરં
　　શ્રિયો નિત્યં ધામાજનિ કનકદુર્ગે ભગવતિ ॥ ૬૪॥

ખગોત્તંસા હંસાસ્તવ ગતિવિલાસેન વિજિતા-
    સ્સલજ્જાસ્તત્તુલ્યં ગમનમધિગન્તું સકુતુકાઃ ।
ભજન્તે સ્રષ્ટારં રથવહન એવૈકનિરતા
    મનોજાતારાતેસ્સતિ કનકદુર્ગે ભગવતિ ॥ ૬૫॥

જગન્માતર્ભવ્યાઙ્ગુળિવિવરમાર્ગેષુ ગળિતં
    ચતુર્ધા તે પાદામ્બુજસલિલમેતદ્ધિજયતે ।
પ્રદાતું ધર્માર્થપ્રમુખપુરુષાર્થદ્વયયુગં
    ચતુર્મૂર્ત્યા વિદ્ધાવિવ કનકદુર્ગે ભગવતિ ॥ ૬૬॥

અજોઽયં શ્રીશોઽયં સુરપરિવૃઢોઽયં રવિરયં
    શશાઙ્કોઽયં કોઽયં સકલજલધીનાં પતિરયમ્ ।
ઇતિ ત્વાં સન્દ્રષ્ટું સમુપગતદેવાઃ પરિચરૈ-
    ર્જનૈર્વિજ્ઞાપ્યન્તે ખલુ કનકદુર્ગે ભગવતિ ॥ ૬૭॥

મહાપીઠાસીનાં મઘવમુખબર્હિર્મુખસખી-
    નિકાયૈસ્સંસેવ્યાં કરતલચલચ્ચામરયુતૈઃ ।
પ્રદોષે પશ્યન્તીં પશુપતિમહાતાણ્ડવકલાં
    ભજે ત્વાં શ્રીમાહેશ્વરિ કનકદુર્ગે ભગવતિ ॥ ૬૮॥

પરઞ્જ્યોતિસ્તજ્જ્ઞાસ્સુરતરુલતાં દુર્ગતજના
    મહાજ્વાલામગ્નેર્ભુવનભયદા રાક્ષસગણાઃ ।
લલાટાક્ષસ્સાક્ષાદતનુજયલક્ષ્મીમવિરતં
    હૃદિ ધ્યાયન્તિ ત્વાં કનકદુર્ગે ભગવતિ ॥ ૬૯॥

સમુદ્યદ્બાલાર્કાયુતશતસમાનદ્યુતિમતીં
    શરદ્રાકાચન્દ્રપ્રતિમદરહાસાઞ્ચિતમુખીમ્ ।
સખીં કામારાતેશ્ચકિતહરિણીશાબનયનાં
    સદાહં સેવે ત્વાં હૃદિ કનકદુર્ગે ભગવતિ ॥ ૭૦॥

તપઃકૃત્વા લેભે ત્રિપુરમથનસ્ત્વાં પ્રિયસખીં
    તપસ્યન્તી પ્રાપ્તા ત્વમપિ ગિરિશં પ્રાણદયિતમ્ ।
તદેવં દામ્પત્યં જયતિ યુવયોર્ભીતધવયોઃ
    કવિસ્તુત્યં નિત્યં નનુ કનકદુર્ગે ભગવતિ ॥ ૭૧॥

વિભોર્જાનાસિ ત્વં વિપુલમહિમાનં પશુપતે-

સ્સ એવ જ્ઞાતા તે ચરિતજલરાશેરનવધેઃ ।
ન હિ જ્ઞાતુન્દક્ષો ભવતિ ભવતોસ્તત્વમિતર-
સ્ત્રીલોકીસન્ધાનેષ્વપિ કનકદુર્ગે ભગવતિ ॥ ૭૨॥

ન વિષ્ણુર્નબ્રહ્મા ન ચ સુરપતિર્નાપિ સવિતા
ન ચન્દ્રો નોવાયુર્વિલસતિ  હિ કલ્પાન્તસમયે ।
તદા નાટ્યઙ્કુર્વંસ્તવ રમણ એકો વિજયતે
ત્વયા સાકં લોકેશ્વરિ કનકદુર્ગે ભગવતિ ॥ ૭૩॥

ધનુશ્ચક્રે મેરું ગુણમુરગરાજં શિતશરં
રમાધીશઞ્ચાપિ ત્રિપુરમથનેન ત્રિનયનઃ ।
તદેતત્સામર્થ્યં સહજનિજશક્તેસ્તવ શિવે
જગદ્રક્ષાદીક્ષાવતિ કનકદુર્ગે ભગવતિ ॥ ૭૪॥

ત્રિકોણાન્તર્બિન્દૂપરિવિલસનાત્યન્તરસિકાં
ત્રિભિર્વેદૈઃ સ્તુત્યાં ત્રિગુણમયમૂર્તિત્રયયુતામ્ ।
ત્રિલોકૈરારાધ્યાં ત્રિનયનમનઃપ્રેમજનનીં
ત્રિકાલં સેવે ત્વાં હૃદિ કનકદુર્ગે ભગવતિ ॥ ૭૫॥

મનો ધ્યાતું નાલં જનનિ તવ મૂર્તિં નિરુપમાં
વચો વક્તું શક્યં ન ભવતિ હિ તે ચિત્રચરિતમ્ ।
તનુસ્ત્વત્સેવાયાં ભવતિ વિવશા દીનસમયે
કથં વાહં રક્ષ્યસ્તવ કનકદુર્ગે ભગવતિ ॥ ૭૬॥

વિયોગં તે નૂનં ક્ષણમસહમાનઃ પશુપતિ-
ર્દદૌ તે દેહાર્ધં તરુણસુમબાણાયુતસમમ્ ।
અનેન જ્ઞાતવ્યસ્તવ જનનિ સૌન્દર્યમહિમા
ત્રિલોકી સ્તોતવ્યઃ ખલુ કનકદુર્ગે ભગવતિ ॥ ૭૭॥

કૃતા યાગા યેન શ્રુતિષુ વિદિતાઃ પૂર્વજનને
ધનં દત્તં યેન દ્વિજકુલવરેભ્યો બહુવિધમ્ ।
તપસ્તમં યેનાસ્ખલિતમતિના તસ્ય ઘટતે
ભવદ્ભક્તિશ્શમ્ભોસ્સતિ કનકદુર્ગે ભગવતિ ॥ ૭૮॥

ભવન્મૂર્તિધ્યાનપ્રવણમમલઞ્ચાપિ હૃદયં
ભવન્નામશ્રેણીપઠનનિપુણાં ચાપિ રસનામ્ ।
ભવત્સેવાદાર્ઢ્યપ્રથિતમપિ કાયં વિતર મે

ભવાનન્દશ્રેયસ્કરિ કનકદુર્ગે ભગવતિ ॥ ૭૯॥

પ્રભાષન્તે વેદાશ્ચકિતચકિતં તાવકગુણાન્
ન પારસ્ય દ્રષ્ટા તવ મહિમવાર્ધેર્વિધિરપિ ।
ભવત્તત્વં જ્ઞાતું પ્રકૃતિચપલાનામપિ નૃણાં
કથં વા શક્તિસ્સ્યાન્નનુ કનકદુર્ગે ભગવતિ ॥ ૮૦॥

નૃપા એકચ્છત્રં સકલધરણીપાલનપરા-
સ્સુધામાધુર્યશ્રીલલિતકવિતાકલ્પનચણાઃ ।
નિરાતઙ્કં શાસ્ત્રાધ્યયનમનસાં નિત્યકવિતા
ત્વદીયા જ્ઞેયા શ્રીમતિ કનકદુર્ગે ભગવતિ ॥ ૮૧॥

કદમ્બાનાં નાગાધિકચતુરસઞ્ચારિભસરી
કદમ્બાનાં મધ્યે ખચરતરુણીકોટિકલિતે ।
સ્થિતાં વીણાહસ્તાં ત્રિપુરમથનાનન્દજનનીં
સદાહં સેવે ત્વાં હૃદિ કનકદુર્ગે ભગવતિ ॥ ૮૨॥

ગિરાં દેવી ભૂત્વા વિહરસિ ચતુર્વક્ત્રવદને
મહાલક્ષ્મીરૂપા મધુમથનવક્ષસ્થલગતા ।
શિવાકારેણ ત્વં શિવતનુનિવાસં કૃતવતી
કથં જ્ઞેયા માયા તવ કનકદુર્ગે ભગવતિ ॥ ૮૩॥

મહારાજ્યપ્રાપ્તાવતિશયિતકૌતૂહલવતાં
સુધામાધુર્યોદ્યત્સરસકવિતા કૌતુકયુજામ્ ।
કૃતાશાનાં શશ્વત્સુખજનકગીર્વાણભજને
ત્વમેવૈકા સેવ્યા નનુ કનકદુર્ગે ભગવતિ ॥ ૮૪॥

ફણી મુક્તાહારો ભવતિ ભસિતં ચન્દનરજો
ગિરીન્દ્રઃ પ્રાસાદો ગરળમમૃતં ચર્મ સુપટઃ ।
શિવે શમ્ભોર્યદ્યદ્વિકૃતચરિતં તત્તદખિલં
શુભઞ્જાતં યોગાત્તવ કનકદુર્ગે ભગવતિ ॥ ૮૫॥

દરિદ્રે વા ક્ષુદ્રે ગિરિવરસુતે યત્ર મનુજે
સુધાપૂરાધારસ્તવ શુભકટાક્ષો નિપતતિ ।
બહિર્દ્વારપ્રાન્તદ્વિરદમદગન્ધસ્સ ભવતિ
પ્રિયે કામારાતેર્નનુ કનકદુર્ગે ભગવતિ ॥ ૮૬॥

પ્રભાષન્તે વેદાઃ પ્રકટયતિ પૌરાણિકવચઃ
 પ્રશસ્તં કુર્વન્તિ પ્રથિતબહુશાસ્ત્રાણ્યવિરતમ્ ।
સ્તુવન્તઃ પ્રત્યગ્રં સુકવિનિચયાઃ કાવ્યરચનૈ-
 રનન્તાં તે કીર્તિં નનુ કનકદુર્ગે ભગવતિ ॥ ૮૭॥

અસૂયેર્ષ્યાદમ્ભાદ્યવગુણપરિત્યાગચતુરા-
 સ્સદાચારાસક્તાસ્સદયહૃદયાસ્સત્યવચનાઃ ।
જિતસ્વાન્તાશ્શાન્તા વિમલચરિતા દાનનિરતાઃ
 કૃપાપાત્રીભૂતાસ્તવ કનકદુર્ગે ભગવતિ ॥ ૮૮॥

યદીયામ્ભસ્નાનાદ્દુરિતચરિતાનાં સમુદયા
 મહાપુણ્યાયન્તે મહિમવતિ તસ્યાશ્શુભકરે ।
તટે કૃષ્ણાનદ્યા વિહિતમહિતાનન્દવસતે
 કૃપા કર્તવ્યા તે મયિ કનકદુર્ગે ભગવતિ ॥ ૮૯॥

યથા પુષ્પશ્રેણીવિલસિતકદમ્બદ્રુમવને
 તનોર્ભાગે નાગેશ્વરવલયિનઃ શ્રીમતિ યથા ।
તથા ભક્તૌઘાનાં હૃદિ કૃતવિહારે ગિરિસુતે
 દયા કર્તવ્યા તે મયિ કનકદુર્ગે ભગવતિ ॥ ૯૦॥

સમારુહ્યાભઙ્ગં મૃગપતિતુરઙ્ગં જનયુતં
 ગળાગ્રે ધૂમ્રાક્ષપ્રમુખબલબર્હિર્મુખરિપૂન્ ।
નિહત્ય પ્રત્યક્ષં જગદવનલીલાં કૃતવતી
 પ્રસન્ના ભૂયાસ્ત્વં મયિ કનકદુર્ગે ભગવતિ ॥ ૯૧॥

પરાભૂય ત્ર્યક્ષં સવનકરણે યત્રસહિતં
 દુરાત્માનં દક્ષં પિતરમપિ સન્ત્યજ્ય તરસા ।
ગૃહે નીહારાદ્રેર્નિજજનનમઙ્ગીકૃતવતી
 પ્રસન્ના ભૂયાસ્ત્વં મયિ કનકદુર્ગે ભગવતિ ॥ ૯૨॥

તપઃ કૃત્વા યસ્મિન્ સુરપતિસુતોऽનન્યસુલભં
 ભવાદસ્ત્રં લેભે પ્રબલરિપુસંહારકરણમ્ ।
કિરાતેऽસ્મિન્ પ્રીત્યા સહવિહરણે કૌતુકવતી
 પ્રસન્ના ભૂયાસ્ત્વં મયિ કનકદુર્ગે ભગવતિ ॥ ૯૩॥

શરચ્ચન્દ્રાલોકપ્રતિમરુચિમન્દસ્મિતયુતે
 સુરશ્રીસઙ્ગીતશ્રવણકુતુકાલઙ્કૃતમતે ।

કૃપાપાત્રીભૂતપ્રણમદમરાભ્યર્ચિતપદે
    પ્રસન્ના ભૂયાસ્ત્વં મયિ કનકદુર્ગે ભગવતિ ॥ ૯૪॥

કપાલસ્રગ્ધારી કઠિનગજચર્મામ્બરધરઃ
    સ્મરદ્વેષી શમ્ભુર્બહુભવનભિક્ષાટનપરઃ ।
અવિજ્ઞાતોત્પત્તિર્જનનિ તવ પાણિગ્રહણતો
    જગત્સેવ્યો જાતઃ ખલુ કનકદુર્ગે ભગવતિ ॥ ૯૫॥

પદાભ્યાં પ્રત્યૂષસ્ફુટવિકચશોણાબ્જવિલસત્-
    પ્રભાભ્યાં ભક્તાનામભયવરદાભ્યાં તવ શિવે ।
ચરદ્ભ્યાં નીહારાચલપદશિલાભઙ્ગસરણૌ
    નમઃ કુર્મઃ કામેશ્વરિ કનકદુર્ગે ભગવતિ ॥ ૯૬॥

મદીયે હૃત્પદ્મે નિવસતુ પદામ્ભોજયુગળં
    જગદ્વન્દ્યં રેખાધ્વજકુલિશવજ્રાઙ્કિતમિદમ્ ।
સ્ફુરત્કાન્તિજ્યોત્સ્ના વિતતમણિમઞ્જીરમહિતં
    દયાऽऽધેયાऽમેયા મયિ કનકદુર્ગે ભગવતિ ॥ ૯૭॥

સદાऽહં સેવે ત્વત્પદકમલપીઠીપરિસરે
    સ્તુવન્ ભક્તિશ્રદ્ધાપરિચયપવિત્રીકૃતધિયા ।
ભવન્તીં કલ્યાણીં પ્રચુરતરકલ્યાણચરિતાં
    દયાऽऽધેયાऽમેયા મયિ કનકદુર્ગે ભગવતિ ॥ ૯૮॥

હરશ્શૂલી ચૈકઃ પિતૃવનનિવાસી પશુપતિ-
    ર્દિશાવાસો હાલાહલકબળનવ્યગ્રધૃતિમાન્ ।
ગિરીશોऽભૂદેવંવિધગુણચરિત્રોऽપિ હિ ભવત્
    સુસાઙ્ગત્યાત્ શ્લાઘ્યો નનુ કનકદુર્ગે ભગવતિ ॥ ૯૯॥

સમસ્તાશાધીશ પ્રમુખ સુરવર્યૈઃ પ્રણમિતા-
    મહર્નાથજ્વાલાપતિહરણપાલી ત્રિનયનામ્ ।
સદા ધ્યાયેऽહં ત્વાં સકલવિબુધાભીષ્ટકલને
    રતાં તાં કલ્યાણીં હૃદિ કનકદુર્ગે ભગવતિ ॥ ૧૦૦॥

સુસન્તોષં યો વા જપતિ નિયમાદૂહિતશત-
    જ્વલદ્વૃત્તૈશ્શ્રાવ્યાં નિશિ કનકદુર્ગાસ્તુતિમિમામ્ ।
મહાલક્ષ્મીપાત્રં ભવતિ સદનં તસ્ય વદનં
    ગિરાં દેવીપાત્રં કુલમપિ વિધેઃ કલ્પશતકમ્ ॥ ૧૦૧॥

સ્તુતિં દુર્ગાદેવ્યાસ્સતતમઘસંહારકરણે
    સુશક્તાં વા લોકે પઠતિ સુધિયા બુદ્ધિકુશલઃ ।
શ્રિયં માતઃ તસ્મૈ વિતરસિ સુતાનાઢ્ય જગતાં
    પતિત્વં વાગ્મિત્વં બહુ કનકદુર્ગે ભગવતિ ॥ ૧૦૨॥

શતશ્લોકીબદ્ધં નનુ કનકદુર્ગાઙ્કિતપદં
    ગુરૂપન્યસ્તં તદ્ભુવિ કનકદુર્ગાસ્તવમિદમ્ ।
નિબદ્ધં માણિક્યૈઃ કનકશતમાનં ભવતિ તે
    યથા હૃદ્યં દેવિ સ્ફુટપદવિભક્તં વિજયતામ્ ॥ ૧૦૩॥

ઇતિ શ્રીમત્પરમહંસ પરિવ્રાજકાચાર્યવર્ય શ્રીવિદ્યાશઙ્કરામાર્ય-
વિરચિતં શ્રીમત્કનકદુર્ગાऽऽનન્દલહરીસ્તોત્રં સમ્પૂર્ણમ્ ।

The composition by Vidya Sankara is addressed to the goddess
Kanaka Durga at Vijayawada of Andhra Pradesh.

Encoded by Malleswara Rao Yellapragada malleswararaoy@yahoo.com
Proofread by Malleswara Rao Yellapragada, PSA Easwaran,
Chandra V Ramani chandravr at gmail.com

---

*Shri KanakadurgA AnandalaharI*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*